THE KUPPUSWAMI SASTR
RESEARCH INSTITUTE,
MADRAS.

॥ श्रीः ॥

दूतवाक्यम्

(चम्पूप्रबन्धः)

मेल्पत्तूर् नारायणभट्टतिरि प्रणीतम् ।

प्रसाधकः

म. हरिहरशास्त्री

प्रकाशकः

आर्. टी. पिल्लै ।

अनन्तशयनस्थ श्रीधरमुद्रालये मुद्रितम् ।

१९३६.

प्रवेशिकाराः ग्रन्थ कर्त्ता
स्वायत्तीकृताः.

मूल्यं ५ आण

॥ श्रीः ॥

दूतवाक्यम्

साकं राजा सगर्भ्यैः समयजलनिधिं
दुस्तरं साधु तीर्त्वा
निर्मुक्तो वक्त्ररन्ध्राद्विधुरिव तमसो
भासमानो नितान्तं ।
पाणिं पार्थात्मजेनाद्भुतभुजमहसा
ग्राहयन्नुत्तरायाः
सन्तुष्यन् बन्धुवर्गैस्सह शमनसुतो
मात्स्यपुर्यां न्यवात्सीत् ॥ १ ॥

सौभद्रस्य विराटजापरिणये
वृत्ते समं पाण्डवै-
रास्थाने मिळितेषु रामशिनिभू-
पाञ्चालमात्स्यादिषु ।
स्वैरालापकथावधौ स भगवान्
दैत्यान्तकः सौहृदात्
पार्थानां करणीयशेषविषया-
मित्थं बभाषे गिरम् ॥ २ ॥

"हा ! धिक्कष्टमिदं सतामपि कथं
पापीयसी हन्त! धी-
रस्मिन् धर्मसुतेऽपि कस्य रसना
दोषं विवक्षेन्मृषा ।
अस्त्वेवं निजशिष्यवत्सलतया
नाऽस्य प्रतिब्रूमहे
तं दुर्योधनमेव मे धनुरिदं
वक्ता शरैरुत्तरम् ॥ ९ ॥

पुंखानामस्तु सन्धिः सुदृढमिह गुणै-
र्नो पुनर्वर्त्तिराप्तैः;
पार्थानां प्रेषितव्यास्समरभुवि शरा
एव शाता न दूताः ।
स्नेहालिप्ता कृपाणी निपततु तरसा
तेषु नो सामवाणी;
भोक्तव्यं वाऽसुजालं ननु रणभुवि तै-
र्नार्धराज्यं कदाऽपि" ॥ १० ॥

द्रुपदः—

"कामं विग्रहसाध्य एव स रिपुः
सामैव कार्यं तथा-
प्यारंभो मृदुपूर्व एव महतां
तीक्ष्णोत्तरो नान्यथा ।

अस्मद्दूतगिरा च शान्तसमरो-
द्योगेषु तेषु क्षणा-
दर्थानां सुहृदाञ्च संग्रहमितः
सांग्रामिकं कुर्महे ॥ ११ ॥

तदनुस भगवान् पञ्चरात्रमपश्चितः पाञ्चालगिरं तां वाञ्छानुगुणामभिनन्दन्नितःपरमपि निजप्रयत्नप्रकाशेन माध्यस्थ्यदीक्षाभङ्गमाशङ्कमानस्तयोरेव पयोधिगम्भीरचेतसोः पाञ्चालमात्स्याधिपयोरधिरोप्य बन्धुकार्यभारं सिन्धुराजमध्यगामध्यगान्निजामेव नगरीम् ॥

नीतिज्ञो मधुरोक्तिभिः शमयितुं
विद्वेषिणामुद्यमं
पाञ्चालः स्वपुरोहितं प्रहितवान्
वेगेन नागाह्वयं ।
पूर्वामन्त्रणकर्मणा वशयितुं
साधारणान् भूपतीन्
मात्स्येन्द्रोपि दिदेश दूतनिवहान्
पार्थानुमत्या जवात् ॥ १२ ॥

प्रोत्साहिता दूतघनैर्भ्रमद्भिः
प्रत्याशमुद्दीर्णानिदेशतोयैः ।
उच्चेलुरुर्वीपतयस्तमाप्तुं
सरित्प्रवाहा इव वारिराशिम् ॥ १३ ॥

कर्णाटानर्तवंगद्रमिलनिषधकां-
बोजसौवीरभोजा-
न्ध्रारट्टावन्तिकुन्त्यश्मकमगधकलि-
ङ्गाङ्गपुण्ड्राधिनाथाः ।
अन्ये च क्षोणिपालाः क्षपितरिपुबला
मूर्धाभिर्दूरनम्रै-
राज्ञां राज्ञो गृहीत्वा समदमुदचल-
न्नुत्सुका युद्धकेल्याम् ॥ १४ ॥

पार्थस्य विज्ञाय चरैः प्रवृत्तिं
विसृज्य राजन्यगणाय दूतान् ।
अर्थी स्वयं द्वारवतीमगच्छत्
सुयोधनः सोऽपि सुतो मघोनः ॥ १५ ॥

तदनु तस्मिन् द्वारभुवि निवेशितबले दूरापसृतपौर-जनकोरकितकरारविन्दवृन्ददन्तुरितोभयपार्श्वेन मार्गेण समतीत्य सप्तकक्ष्यान्तराणि प्रकटितकपटस्वापस्य कुहनामानुषस्य भगवतो वासुदेवस्य वासभवनं प्रविश्य तत्र च शिरोभागनिहितमहितभद्रासनमध्यमध्यासीने यानधनं सुयोधने, स धनञ्जयोऽपि निभृतमुपगम्य कृताञ्जलिस्तस्य वैकुण्ठस्य चरणोपकण्ठे कुण्ठेतरधियां वरिष्ठस्तिष्ठन्नेव प्रबोधसमयं प्रभोः प्रतिपालयामास ॥ १५ ॥

काले तस्मिन् प्रबुद्धः किल मधुमथनो
वीक्ष्य तिष्ठन्तमग्रे
जिष्णुं व्यावृत्य किञ्चित् कुरुपतिमपि तं
रत्नपीठे निषण्णम् ।
तौ सर्वज्ञोप्यजानान्निव कृतकुशल-
प्रश्न एवं बभाषे
किं तादृक्कार्यमद्य स्वयमुपगमनात्
क्लेशितौ यद् भवन्तौ ॥ १६ ॥

श्रुत्वा तयोरागमनस्य हेतु
कार्यं समं कर्तुमियेष शौरिः ।
भर्तुः कुरूणां प्रथमागतस्य
दृष्टस्य च प्राक् पुरुहूतसूनोः ॥ १७ ॥

कृष्णः—

"नूनं पूर्वमुपागतः खलु भवान्
दृष्टस्तु पूर्वं मया
जिष्णुस्तत्सदृशी दशेयमिह मे
तुल्येऽत्र मित्रद्वये ।
योधानां दशकोटयस्तादिह मे
नारायणाख्यावृतां
सन्त्येकस्य, परस्य चास्मि सचिवो
युद्धे निरस्तायुधः ॥ १८ ॥

इति वादिनं मधुभेदिनमेव वृतवति कृताधियामग्रेसरे फल्गुने समुदञ्चितकौतुको नागकेतुरपि परिगृह्य तत् परम बल-मुद्धणभुजबलोद्भटानां भटानां कृतवर्मयुक्तया समस्तभुवन-विक्षोभिण्या पुनरक्षौहिण्या परिवृतः स्वमेव नगरमया-सीत् ॥

निर्यातेऽथ सुयोधने निजकरे-
णालम्ब्य सख्युः करं
प्रोन्मीलन्मधुरास्मितार्द्रतरया
वाचा तमूचे हरिः ।
"कार्यं किं पुनराकलय्य तरसा
योधानबाधानिमा-
नाधुन्वन्नामितानशस्त्रमायि ! मा-
मेकं वृथैवावृथाः" ॥ १९ ॥

अर्जुनः—

"जानन्नेव किमद्य मोहयसि मां
देव त्वदेकाश्रयं
किं देवैरपि सासुरैर्मम यदि
प्रत्यर्थिपक्षे भवान् ।
कामं स्यात् बहुरेक एव यदिवा
शस्त्री विशस्त्रोऽथवा
जेतुं त्रीणि जगन्त्यपि प्रभुरहं
सान्निध्यमात्रेण ते" ॥ २० ॥

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MADRAS-4

ततस्स तेनार्थितमन्वमंस्त
सारथ्यमीशो जगतां त्रयाणाम् ।
समाश्रितानामवनाय कर्म
नीचैरपि स्वीक्रियते महद्भिः ॥ २१ ॥

प्रीतस्स तस्यां पुरि वासराणि
द्वित्राणि नीत्वा सह माधवेन ।
लिप्सोर्निजां भूमिमजातशत्रो-
र्ययौ सकाशं विधिनेव यत्नः ॥ २२ ॥

अक्षौहिणीनां महता भरेण
क्षोणीमशेषामपि कम्पयन्तः ।
युयुत्सवः क्ष्मापतयोऽध्यवात्सु-
र्विराटकौरव्यपुरोपकण्ठान् ॥ २३ ॥

कौन्तेयपार्श्वं महता बलेन
गच्छन् प्रहृष्टः पथि सत्क्रियाभिः ।
साह्यं प्रतिश्रुत्य सुयोधनाय
मद्राधिपो मात्स्यपुरीमयासीत् ॥ २४ ॥

स तत्र पार्थं श्रुतमार्गवृत्तं
भूत्वा नियन्ता तनयस्य पूष्णः ।
तेजो निहन्यामिति भाषितेन
सन्तोष्य कौरव्यसकाशमागात् ॥ २५ ॥

सुमहति बलषण्डे पाण्डवान् कौरवान-
प्युपगतवति पार्श्वालेरितस्तत्पुरोधाः ।
कुरुगुरमभियातः पाण्डवानां बभाषे
बलविभवमशेषं सन्धिवाञ्छां च चित्ते ॥२६॥

"सप्ताक्षौहिण्य एषां खलु परिमिलिताः
सन्ति चान्याश्चतस्रो-
ऽप्यक्षौहिण्योऽनपाया नकुलतदनुजौ
सात्यकिर्भीमसेनः ।
उद्रिक्ताः षड्रथाश्चेत् पशुहरणरणे
दृष्टकर्मा स एक-
स्तेभ्योऽलं सव्यसाची स पुनरतिशय-
श्वक्रिणो यत् कृपैषाम् ॥ २७ ॥

एवं स्थितेऽपि बहुबन्धुवधानुबन्धात्
सन्धित्सवो न तु भृशं विजिघृक्षवोऽमी ।
तच्चिन्त्यतां हितमिति" प्रवदन् गतोऽसौ
भीष्यादयः शिशमिषा श्रवणात् प्रसेदुः ॥ २८ ॥

स्नेहान्धो जन्मनान्धोऽप्यथ स कुरुपिता
सामभिः साधयिष्यन्
पार्थानां शान्तिभाजां पुनरटविगतिं
शीलमेषां प्रशंसन् ।

तत्त्वज्ञं नीतिविज्ञं प्रियहितनिरतं
प्राहिणोत् सञ्जयं तं
सोऽपि प्राप्याभितुष्टश्च बहुविधकुशल-
प्रश्नकारी बभाषे ॥ २९ ॥

"स्नेहाधिक्येन युष्मानुपदिशति पिता
भूतमैत्रीविचारः
शान्तिः क्षान्तिर्दया चेत्यखिलगुणगणै-
र्नित्ययुक्ता हि यूयम् ।
आकिञ्चन्ये च राज्ये स्फुटमिह तुलया
तालित राज्यमुच्च-
र्न्यूनं प्राहुस्तदर्थं बहुविधदुरितं
को नु कुर्याद्विवेकी ? ॥ ३० ॥

भर्तव्यं स्वशरीरमेव, सुलभं
भोक्तुं यथेच्छं फलं,
शय्याश्चारुशिलातलानि, सरितां
तोयं च पेयं लघु ।
साध्यं विश्वमपि स्थिरेण तपसा
तद्भाग्यभाजामहो !
सम्प्राप्यो वनवास एव नगरी-
वासाद्गरीयस्तरः ॥ ३१ ॥

बघ्नात्येव हि यत्रयत्र ममतां
तत्तद्विषादास्पदं,
यस्त्वात्मंभरिरेव तस्य गुणिनो
राज्यं हि सर्वा मही ।
तद्वो बन्धुतमस्य पुण्यसुलभ-
स्यैतस्य लक्ष्मीपते-
र्गेहे सौहृदवास एव किमुत
श्रेयान् बहूनां वधात्" ॥ ३२ ॥

ईदृग्गिरामफलतावगमात् सलज्जे
राजाज्ञयैव खलु शंसति सञ्जयेऽस्मिन् ।
सर्वेषु च प्रतिविवक्षुषु पाण्डवेषु
धर्मात्मजः स्वयमुवाच वचो गभीरम् ॥ ३३ ॥

धर्मात्मजः—

"सत्यं प्रेमातिरेकादनुगदितमिदं
तेन पित्रा कुरूणां
श्रेयानप्येष मार्गो लगति न मनसि
क्षात्त्रदोषाकुले नः ।
सौहार्दादेव पूर्वं शकुनिरकृत नः
किञ्चिदारण्यवासं
येन प्राप्तानि तानि त्रिपुरहरवरा-
दीनि भूयःफलानि ॥ ३४ ॥

जानास्येव सुयोधनस्य कुनयं
राज्ञश्च तद्वश्यतां
धीमन्! सञ्जय! तत् किमीदृशगिरा ?
क्षत्त्रान्वयोत्था वयम् ।
किन्त्वागांसि सुदुस्सहान्यपि हृदि
क्षन्ताऽस्मि, सन्धिं वृणे,
शक्रप्रस्थपुरेऽर्धराज्यमुगहं
प्राग्वत् प्रकल्प्येत चेत् ॥ ३५ ॥

अथवा किमनेकजल्पितै-
र्वयमेते यदुनायकाश्रयाः ।
स वदिष्यति नः क्षमं हितं
निगमः सद्गतिकामिनामिव" ॥ ३६ ॥

कृष्णः—

"धीमन्! गावलगणे! मद्वचनमिदमपि
श्रावयान्धं नृपं तं
मन्तूयद्भिः पृथासूनुषु तदपकृतं
ते तनूजैरकस्मात् ।
काकोलाग्निप्रदानादिभिरपि शकुने-
स्तादृशैः छद्मवृत्तै-
स्तत्सर्वं वासुदेवे मयि नियतमपा-
कारि नो पाण्डवेषु ॥ ३७ ॥

एतत्तन्मम नापयाति हृदया-
दद्यापि, मध्येसभं
कृष्टा केशभरं विकृष्टवसना
दुश्शासनेनाकुला ।
"हा कृष्णेति" विदूरवासिनमहो !
कृष्णा भृशं प्रारुद
द्यन्मां सञ्जय ! किं हतेष्वपि कुरु-
ष्वेतस्य शान्तिर्भवेत् ? ॥ ३८ ॥

राज्ञाऽनुज्ञा वितीर्णा, समजनि मुदितो
मारुतिः सानुजन्मा
क्रुद्धो गाण्डीवधन्वा, वयमपि सुहृदो,
ब्रूहि तत्प्राप्य सर्वान् ।
पुत्रैर्दारैश्च मित्रैर्विहरत मुदितै-
रन्नपानैश्च तृप्ताः
प्रीत्या पात्रेषु चार्थान् विसृजत कुरुत
स्वानि कार्याणि चार्याः" ॥ ३९॥

श्रुत्वैवं "तर्हि यास्याम्यह"मिति चलितं
सञ्जयं प्राह राजा
"प्रेमान्धे ! तत्र सर्वान् वद कुशलमयं
पाण्डवः पृच्छतीति ।

...E KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MADRAS-4

अन्ते च ब्रूहि दुर्योधनमनयनिधिं
निर्दयं मुञ्च माऽस्मान्
ग्रामाणां पञ्चकं वा प्रदिश वितनुमो
जीवितं तावताऽपि" ॥ ४० ॥

व्यक्तार्थं च सुदुःश्रव मधुरम-
प्युद्वेगदं तद्वचो,
गत्वा नागपुरं व्यजिज्ञपदसौ
राज्ञेऽञ्जसा सञ्जयः ।
प्रज्ञाचक्षुरपि क्षयं निजतनू-
जानां विचिन्त्याकुलो
निर्निद्रो विदुरेण नीतिविदुरे-
णाश्वासितोऽभून्नृपः ॥ ४१ ॥

पार्थानां समरोद्योगं
श्रुत्वा सञ्जयतस्तदा ।
दातुं राज्यमयाचन्त
कुलवृद्धास्सुयोधनम् ॥ ४२ ॥

सर्वेषामात्मबन्धूनां
निरस्य वचनं हितम् ।
उदयुङ्क्त रणायैव
राज्यलुब्धस्सुयोधनः ॥ ४३ ॥

यावद्दौत्यानियुक्तसञ्जयमुखे-
नावेदितं वश्चकः
पञ्चग्रामटिकाप्रदानमपि ही !
दुर्योधनो नाशृणोत् ।
तावत् पाण्डुसुताः समेत्य पुनर-
प्येकान्तबन्धुं हरिं
प्रोचुर्दौत्यविधिं चिकारयिषवः
सन्धानबद्धाशयाः ॥ ४४ ॥

धर्मपुत्रः—

"युद्धं तैरुचितं तदेव रुचितं
चित्तं तथापि प्रभो !
यावद्बाधमबाधनाय सुहृदां
कार्यश्शमाय श्रमः ।
तत् कञ्जायतनेत्र ! सञ्जयमुखे-
नादिष्टमेवाखिलं
त्वं दौत्येन समेत्य वर्णय पुनः
सर्वान् कुरून् मे गुरून्" ॥ ४५ ॥

कृष्णः —

"स्थाने धर्मतनूज ! ते मतिरियं
सन्धानमेतत् पुन-
र्दुस्साधं मम भाति संभृतरणो-
द्योगेऽद्य दुर्योधने ।

वाक्पारुष्यञ्च वक्ष्यामि संसदि रिपो-
र्दोषानदोषांश्च ते
लोकास्तान् प्रविदन्तु नान्यदनुना
दौत्येन मन्ये फलम् ” ॥ ४६ ॥

भीमः—

“मैवं केशव ! तत्र रूक्षवचसा
रोष्यस्त्वया कौरवः
सान्त्वैः शान्तिमुपेत्य यच्छतु स न-
स्तुच्छां महीमिच्छया ।
येन स्वं कुलमप्रणाश्य नृपतीन्
नोन्मथ्य वामभ्रुवा-
मभ्रूण्यप्यनिपात्य भृत्यसमया
वृत्त्यापि वर्तामहे” ॥ ४७ ॥

कृष्णः —

“ही ही ! हासवशात् सरन्ति न गिरो
धिग्भीम ! ते भाषितं
भोः किं किं न करोषि रोषदहन-
ज्वालाकुलस्त्वं पुरा ।
अद्योरुः किमु वेपते विमृशतो
दौर्योधनीं तां गदां
किं दुश्शासनशोणितासवरसे
जातं तवारोचकम् ”१ ॥ ४८ ॥

इत्थं निशम्य करुणामृदुतां क्षणोत्थां
दूरं क्षिपन् झटिति मारुतभूरुदस्थात् ।
कल्पान्तरुद्र इव विष्टपमट्टहासै-
र्भिन्दन् जगर्ज च ससर्ज च वाचमेवम् ॥ ४९ ॥

भीमसेनः —

"को भीरुंकारमाक्रोशति भुवनजुषां
भीतिदं भीमसेनं?
भोस्सम्प्रत्येष हस्तभ्रामितगुरुगदा-
घट्टनैर्धार्तराष्ट्रान् ।
पिष्टाहं दुष्टदुश्शासनरुधिरजलैः
क्रोधवह्निं विनेष्ये;
सन्धातुं याहि दामोदर ! सरणिमसृक्-
सिन्धवो रुन्धतां ते ॥ ५० ॥

प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न च खलु किरीटी न च यमौ ।
जरासन्धस्योरःस्थलमिव विरूढं पुनरपि
क्रुधा भीमस्सन्धिं विघटयति; यूयं घटयत !
[॥ ५१ ॥

युष्मच्छासनलंघनांभसि मया
मग्नेन नाम स्थितं
प्राप्तानामिह गर्हणां स्थितिमतां
मध्येऽनुजानामपि ।

क्रोधोल्लासितशाणतारुणगद-
स्योच्छिदतः कौरवा-
नद्यैकं दिवसं ममासि न गुरु-
र्नाहं विधेयस्तव ॥ ५२ ॥

कृष्णः —

"अयथापुरभावमार्य ! ते
परिमार्ष्टुं परमेतदीरितम् ।
अभिशाम्यतु सौम्य ! ते मतिः
समरं प्राप्स्यसि पञ्चषैर्दिनैः ॥ ५३ ॥

अर्जुनः —

मन्ये गोविन्द ! सन्धौ विमुख इव भवान्
येन दुस्साधमेनं
ब्रूते, सम्यक्प्रयत्नैर्न खलु नयविदां
दुष्करं नाम लोके ।
त्वन्तु त्रैलोक्यकर्ता भवति हि भवतः
काममात्रेण सर्वं;
तद् सन्धौ साधु यत्नं कुरु करुणमति-
र्याचते ते वयस्यः" ॥ ५४ ॥

कृष्णः —

साधिष्ठोपि प्रयत्नो विधिशरणफलो
गीष्पतेरप्यवश्यं
यत्नैकव्यापृतानामिह फलविलये
शोकमात्रं विशेषः ।
यत्नः श्रेयान् मतश्चेद्वद सगरसुतैः
केन नाप्तस्तुरङ्गो
यूयं वा केन बुध्वा पुनरपि पतिताः
कैतवद्यूतपङ्के ॥ ५५ ॥

जिष्णो ! जानीहि यत्नान्मम तु न भुवने
दुष्करं नाम किञ्चित्
कार्ये तस्मिन् करिष्ये ध्रुवमहमधुना
मानुषं यत्नमेव ।
नो चेन्निश्शेषदोषात्मनि कुरुवृषभे
यत्नतो रक्ष्यमाणे
नश्येत् सर्वेयमुर्वी कथमिह भविता
कारणं वासुदेवः ॥ ५६ ॥

संवत्सरं परिचिता तव षण्डता सा
यातापि गोग्रहविधौ पुनरागता किम् ?।
शोचामि गाण्डिवमहं शरधी च दिव्यौ
वैकर्तनो जयति शस्त्रभृतां वरिष्ठः ॥ ५७ ॥

नकुलः—

"श्रुतमखिलपते! यत् सांदराणाञ्च वाक्यं
पुनरपि हृदयस्थं किं मया गूहनीयम् ।
स्वजनवधविरागः सन्धिरागश्च भूयात्
मम हृदि कलय त्वं भीरुतां चारुतां वा" ॥५८॥

सहदेवः—

"नाहं हरे! क्षणमपि स्पृहयामि सन्धिं
कौरव्यवाक्शरसहस्रविभिन्नमर्मा ।
लोकानुवृत्तिविधये गुरुभक्तये वा
दौत्यं विधेहि ; भगवन् ! न तु सन्दधीथाः"
[॥ ५९ ॥

भगवान् :—

"सहदेव ! त्वमेवेह प्रथमः पाण्डुसूनुषु ।
अयि वीर ! चिरं जीव भविता ते रणोत्सवः
[॥ ६० ॥

अथ तदानीं मानिनीजनमौलिरत्नभूता धृष्टद्युम्नसो-
दरी पञ्चपाण्डवप्रियतमा पाञ्चालराजप्रियतनया चिरतरसम-
धिगतदुस्सहपरिभवनिस्सहहृदया मुहुर्मुहुर्निरंकुशांकुरितदुश्श-
सनवक्षोविक्षोभणावलोकनौत्सुक्यादिव दिवसस्य शतकृत्वः
समयावसानदिवसगणनया कथमपि समापितत्रयोदशसंवत्सरा
तत्समाप्तिसमयसम्पाद्यमानसम्महारोद्यमसैन्यसंभारसम्पत्तिर्ल-

प्रीतचेताः, तदन्तरे पुनः सन्धित्सापिशाचिकावेशाविवशीभाव-
विश्लथप्रकृतीनां विश्ववीराणामपि निजवल्लभानां अविज्ञात-
निजपरिभवां अवज्ञातस्वप्रतिज्ञां अधरीकृतशौर्याटोपां विधु-
रीकृतवैरानुबन्धामतिमसृणां तादृशीं गिरं नातिदूरनिषण्णा
संशृण्वती,

अगणितबहुवैरं कौरवैस्सन्धुकामं
जिगमिषुमथ कृष्णा कृष्णमाकर्ण्य खिन्ना ।
विगलितधृतिसारं प्राप्य पार्श्वं पतीनां
न्यगददुदितरोषावेशलोलां च वाणीम् ॥ ६१॥

पाञ्चाली —

"राज्ञो यत् सहजान्वितस्य रुचितं,
न्यित्ते च यत्ते मतं,
मित्राणामपि सम्मतं तदुचितं
सन्धानमेवाधुना ।
वेणीयं करुणानिधे! कुरुसभामध्ये
निबद्धा चिरं
स्मर्तव्या गुणकीर्तनेषु सुहृदा-
मेतावदेवार्ययें" ॥ ६२ ॥

इति वदन्तीं निरन्तरोद्धान्तबाष्पांशुसन्तानखिन्दान-
वदनारविन्दां द्रुपदनन्दनामानन्दयन् गोविन्दो मन्दमन्दमवा-
दीत् ।

श्रीकृष्णः—

"भद्रे! पाञ्चालि! वाञ्छा तव खलु नियतं
भाविनी; किन्तु सन्धौ
सोऽहं यत्नं सपत्नैः कुरुवरकुनय-
क्षयापनायैव कुर्वे।
वेणीयं गार्भिणी ते सुतनु! कतिपयै-
र्वासरैर्या सवित्री
वेणीबन्धाननन्तान् दिशि दिशि विमत-
क्ष्माभृदन्तःपुरेषु ॥ ६३ ॥

मुग्धे! पार्षति! वक्त्रपङ्कजमिदं
बाष्पांबुधाराहिमै-
र्मा मा ग्लापय तन्वि! नन्वयमहं
दामोदरस्ते गतिः।
यत् सत्यं शृणु पञ्चभैरयि! दिनै-
र्द्रष्टासि दुष्टान् कुरून्
भूपृष्ठे पतितान्, प्रियान् पुनरमून्
पूर्णप्रतिज्ञाभरान् ॥ ६४ ॥

इत्थं सत्राशनशात्रवसपत्राकरणसत्राय दीक्षितो भूभारक्षपण-शान्तिकर्ममान्त्रिकवरो मधुरिपुः, अधरितसुधावेण्या वाण्याऽऽनन्दित-पाण्डुनन्दनो दारुकोपस्थापितं रथमारुह्य सशैनेयैर्गणैयैः सेनाभटैः सनाथीकृताग्रभागो नागपुरं गन्तुमुदयुङ्क्त; प्रस्थितं च तमुपास्थि-षत निस्तुषप्रशस्तिशालिनः समस्तलोकदुष्कृततमःस्तोमविशस्तिगम-

स्तिमालिनस्तपस्विनः सनकादय ; हृषीकेशोऽपि तानृषीनच्युतपद-
मिच्छून् कच्चरेतरचित्तान् उचितैरुपचारैरर्चयिन्वा " श्वः प्रभाते सु-
योधनसभायां सन्निधातव्यं भवद्भिः "

इत्याभाष्य विसृज्य च सत्यकापत्येन सत्रा चित्राः कथाः कुर्वन्,
उर्वीभारभूतोर्वरावरदुर्वारगर्वनिर्वापकदोर्वीर्यसर्वोत्तीर्णसुत्रामसुतसमास-
न्नसूतभावमहोत्सवं आत्मनानुभोक्ष्यमाणमुत्तरेक्ष्यान्तरान्तरा सन्तुष्यन्,
आवसथेषु च वसुधासुधाशनानां आतिथ्यानुपदमाशीर्वादानाददानः,
अच्छिन्नांभस्सन्तानाः स्रवन्तीः सन्तरन्, उत्तुङ्गान्यद्रिशृङ्गाण्या-
रोहन्, पङ्कजरजःपङ्किलपङ्कजिनीपयःपवमानपोतापनीताध्वश्रमः,
समुदित्वरमहत्तरमहोज्ज्वलकायकान्तिकन्दलकलिन्दापत्यांभस्संभिन्न-
महासरस्रवन्तीजलप्रवाहावगाहनापास्तसमस्तजन्मतांहस्ततिः कौ-
स्तुभलक्ष्मा हस्तिनपुरोपकण्ठमहास्त, गभस्तिराडप्यस्तगिरिशिर-
स्तटीम्;

आश्नुवत निश्शेषविश्वम्भरां विहाय शनैश्शनैः काश्मीररो-
चिषो रश्मयो हारिदश्वाः शिलोच्चयशिखराणि;

एवं समायाते सायाह्नि स कंसघाती घूर्णमान घुमुघुमित
निध्वानबधिरीकृतप्रपञ्चं पाञ्चजन्यमापूरयामास।

अनन्तरमम्बुजाक्षकम्बुराजजन्मना अनन्तान्तरालनिरन्तरीभू-
तेन तेन बोधितमाधवागमनमुदिता नितरासुदर्घूर्णत कुरुराज-
राजधानी।

RESEARCH INSTITUTE
MADRAS-4

ततश्चापास्य कुरुकुलोत्पातकेतुं नागकेतुं, पुरस्कृत्य कृत्स्ना-गमनिष्णातमतिं विष्णुपदीसूनुं, कौरवपरित्राणोन्निद्राणं द्रोणं, दामोदरदर्शनसादरं विदुरं, दुर्वारबाहुस्थामानमश्वत्थामानं, मान्यानन्यांश्च सत्वराः कौरवाः सर्वतः सन्ताडितभेरीरवापूरितरोदोविवरा महत्या वाहिन्या सार्द्धं प्रीत्युत्फुल्लदृशः प्रत्युज्जगमुर्जगन्नाथं ; भक्तिप्रपन्नाः प्रणामादिभिश्चोपाचरन् ;

दाशार्होऽपि तान् यथार्हं पर्हयामास; तदनु तस्मात् प्रदेशात् मन्दहाससुन्दरनिजवदनारविन्दसन्दर्शनकन्दलदानन्दातिरेकमन्दीभूत-गतिभिरमीभिः परितः पौरवपुरं पुरुषोत्तमः प्राविशत् ; प्रविश्य च क्षत्रा दत्तहस्तो रथादवतीर्य रथ्यावीथीमध्यातिष्ठत् ।

दिदृक्षवे पौरवधूजनाय
मुरारिमाख्यातुमिवापतन्तम् ।
पुरे पटीयान् प्रतिसौधगर्भं
बभ्राम मङ्गल्यमृदङ्गघोषः ॥ ६५ ॥

त्यक्त्वा तदा मण्डनमर्द्धकल्पं
क्रियासु चान्यासु कृतानपेक्षाः ।
अभ्रेषु विद्युल्लतिका इवाशु
नार्यः पदं हर्म्यतलेषु चक्रुः ॥ ६६ ॥

नलिननयनोऽपि तासां कलिन्दनन्दिनीकल्लोलतुल्य-
कुल्याभिर्विलोचनकुवलयमालाभिः सञ्छन्नमूर्तिः समतीत्य
कक्ष्यासप्तकं संभृतमङ्गलोपहारनिकुरुम्बमाम्बिकासूनोः सद्म
पद्मापतिः प्रतिपेदे ॥

दृष्ट्वा भीष्माम्बिकेयप्रमुखकुलगुरून्
धार्तराष्ट्रस्य गेहं
यातो देवोऽथ तेन छलनिपुणधिया
भोक्तुमामन्त्र्यमाणः ।

अन्नं सम्प्रीतिभोज्यं न च खलु मयि सं-
प्रीयसे कौरवेति
क्षत्तुर्गेहं जगाहे हरिरतिकुतुकी
भक्तभक्ते रसार्द्रे ॥ ६७ ॥

प्रविश्य विश्वार्तिहरः स देवो
दृष्ट्वा पृथां पुत्रवियोगखिन्नाम् ।
आश्वासयद् द्रक्ष्यसि निर्जितारी-
नल्पैरहोभिस्तनयांस्तवेति ॥ ६८ ॥

कृताह्निकस्तत्र कृतार्थभाव-
मासेदुषस्तल्पसमीपभाजः ।
रणैषिणां पाण्डुसुवामुदन्तं
क्षुत्क्षुर्वदन्नेव निशामनैषीत् ॥ ६९ ॥

कल्पप्रत्यूषकृत्यस्तदनु कुरुपतिः
सेवितस्सौबलाद्यै-
रास्थानीमात्तभूषो नृपवृषभवृतां
प्राप्य देदीप्यमानः ।
नत्वा गाङ्गेयमुख्यान् निजपितृवचसा
तुङ्गमङ्गाधिराज-
स्कन्धासङ्गी स भद्रासनमलमकरो-
ददे चाऽथ वाचम् ॥ ७० ॥

"हे! भूपाः शृणुतादराद्युपगतो
दूतः पृथाजन्मनां
मायामोहितमूढलोककलित-
प्रौढिस्स गोपालकः ।
प्रत्युत्थास्यतियोऽस्य दास्यति स मे
दण्ड्यः सुवर्णान् मितान्
भारद्वादशकेन शासननिरा-
वर्तां जगत्यामिति" ॥ ७१ ॥

बालातपप्रेक्ष्यतराम्बरोय-
मानन्दिताशेषविलोचनाब्जः ।
प्राचीमिव प्रातरिनो मुरारि-
र्वैचित्रवीर्यस्य सभां विवेश ॥ ७२ ॥

आलोक्यैनं प्रतिहतदृशस्तेनसा भूमिपाला-
श्चेलुः स्थानाद्गणितनृपोदीर्णदण्डास्समस्ताः ।

सावष्टम्भः स च कुरुपतिर्मूढधीः पीठदेशा-
द्विभ्रष्टोऽभून्निमषति परितः क्ष्मापलक्षे विलक्षः
[॥ ७३ ॥

स सर्वतोभद्रमिति प्रशस्त-
मातस्थिवानासनमम्बुजाक्षः ।
निष्पन्दसभ्येक्षणलक्ष्यमूर्त्तिः
प्रज्ञादृशं भूमिपतिं बभाषे ॥ ७४ ॥

राजन्! कौरववंशकैरवसुधा-
सूते! पृथासूनुभि-

र्दूतोऽहं प्रहितो हिताय सुहृदां
सन्धित्सुभिस्साम्प्रतम् ।

मा भूत्त्वन्मतिरन्यथा तदपथो-
द्युक्तान् निरुद्ध्याधुना
पुत्रांस्ते स्वपुरे पुरेव कुरु तान्
पाण्डोः सुतानादृतान् ॥ ७५ ॥

वीरैरूरीकृतैस्तैरुभुजविभवैः-
र्मात्स्यपाञ्चालमित्रैः

पुत्रैरेभिश्च भीष्माद्यातिरथमाथिता-
रातिभिर्वीतवैरैः ।
नित्यं त्वत्तोऽभिगुप्तात्त्वसति सुरपतिः
सोऽपि भेदे तु राजन् !
नष्टेष्वेतेषु शिष्टेष्वपि च कतिषुचित्
कोनु लाभो भवेत्ते ॥ ७६ ॥

विज्ञापयन्ति च भवन्तमनन्तखेद-
प्रोद्वान्तबाष्पभृतगद्गदरुद्धकण्ठाः ।
दूरावनम्रशिरसश्चिरसोढपीडा-
भारासहा इव नराधिप ! मन्मुखेन
[॥ ७७ ॥

बाल्ये येन विवर्धिताः कृताधिया
पुष्टाः स्वपोषं वयं
वात्सल्यादथ तासु तासु विनयं
विद्यासु च ग्राहिताः ।

वाचा तस्य तवानुभूतविपिन-
क्लेशाश्चिरादागता
भूयस्त्वत्कृपया लभेमहि गही-
मात्मांशभूतामिति ॥ ७८ ॥

तत्सम्प्रति स्वीकुरु तान् प्रवीरां-
स्तवोज्ज्वलस्य स्थितये कुलस्य ।
तदर्थमंते च गता नरेन्द्रा
निवृत्तकृच्छ्राः प्रतियान्तु देशान् ॥ ७९ ॥

नृपस्तमाभाषत, किन्नु कुर्या-
मयं सुतो मे न वचः शृणोति ।
सान्त्वेन दाशार्ह ! निवर्तयैनं
कदध्वनः सौहृदनिघ्नचेताः ॥ ८० ॥

उक्तश्च तेनैवमथासुरारि-
र्विवृत्य वक्षो वलमानहारः ।
एकासनाद्धयासिनि भानुसूना-
वुपाश्रितं कौरवमाबभाषे ॥ ८१ ॥

जातस्वं विमले कुले शशभृत-
स्त्वामाश्रिता श्रीस्स्वयं
कर्णाद्यैः करदीकृताः क्षितिभृतः
कुप्यन्ति तुभ्यन्तु ये ।
त्वत्तो लब्धसमीहिता हि सुहृदः
पृथ्वी तवाऽस्ते वशे
त्वय्येवं गुणभाजनेऽप्यपनयो
लब्धास्पदोऽयं कथम् ? ॥ ८२ ॥

तत्तादृशं शृणु महत्तव वंशवृत्तं
पूरुर्ह्रदौ नववयः पितुरात्तजैर्ण्यः ।
त्यक्त्वाश्रमं पितृमुदे तृणवद्द्वितीयं
देवव्रतोऽयमिह तिष्ठति धीरधीरः ॥ ८३ ॥

दुर्द्यूतदेवनगुरुस्तव मातुलोऽयं
कर्णस्तु दुर्नयमहार्णवकर्णधारः ।
तस्मादयुक्तमनयोरनुवर्तनं ते
पथ्यं न यो वदति भर्तुरसौ हि शत्रुः
[॥ ८४ ॥

सार्धं दुरन्तैः सचिवोपदेशै-
र्क्लीबं विसृज्योभयलोकशत्रुम् ।
सङ्गम्य पार्थैस्सह सौहृदेन
हतद्विषं भुङ्क्ष्व महीमशेषाम्" ॥ ८५ ॥

तावत्सुत व्याहरदाम्बिकेयः
"प्रसीद बद्धोऽयमिहाञ्जलिस्ते ।
मन्युज्वरस्यौषधमार्तबन्धो-
श्शौरेर्वचः पथ्यमिदं पिबेति" ॥ ८६ ॥

तमूचतुः शान्तनवो गुरुश्च
"क्षेमाय सन्धत्स्व युधिष्ठिरेण ।
चापेषु मास्त्यग्रमुखा रणाग्रे
न सायकान् सन्दधतां नरेन्द्राः ॥ ८७ ॥

चिराय योगं कुरुपाण्डवानां
निरीक्ष्य राजन्यगणः समेतः ।
प्रमोदजं मुञ्चतु वारि नेत्रै-
र्न शोणितं पार्थशरक्षताङ्गैः ॥ ८८ ॥

वचांसि लोकः प्रणयोचितानि
शृणोतु तेषां भवतां च हृष्टः ।
निर्घातघोरान् क्रुपितस्य संघे
समीरपुत्रस्य न सिंहनादान् " ॥ ८९ ॥

राधासुते हसति कल्पितहस्ततालै
दुश्शासने च हशि सूचितसान्धिदोषे ।
सम्प्रेक्ष्य मातुलमुखं प्रहसन् कुरूणा-
मीशोऽपि केशवमुवाच वचो नृशंसः ॥ ९० ॥

"आबाल्याद्ये विरोधं व्यदधत विविधं
साधुवृत्तेष्वकस्मा-
दप्यस्मास्वात्तवैरास्सदासि विनिकृता
देवने ते सुदीनाः ।

नीता मे नीतियोगादहह वनभुवं
भीममुख्यास्त्वदीयाः
प्रायोवृत्तं तदेतात्त्रिभुवनविदितं
दूत ! जानासिनोवा ॥ ९१ ॥

वृद्धौ लब्ध्वा विराटद्रुपदकुनृपती
साम्प्रतं साह्यकृत्ये
मह्यं द्रुह्यन्ति यत्ते किमिह बहुतरं
ब्रूमहे हास्यमेतत् ।
गच्छ त्वं ब्रूहि पार्थान् मयि धरणिरियं
सुस्थिरा तत् प्रदास्ये
युष्मभ्यं पुण्यलभ्यं रणभुवि निशितैः
सायकैर्नाकलोकम् ॥ ९२ ॥

भगवान् —

श्रीमन्नेष भवन्मनोरथतरुः
कर्णादिदुर्मन्त्रितै-
रुन्मीलत्कुसुमाश्रितः शकुनिना
कालेऽफलिष्यत् स्वयम् ।
तद्गच्छाधरमूर्ध्नि मग्नमुदम -
ञ्जिष्यन्न चेदर्जुन -
स्योच्चण्डाहितषण्डखण्डनकला -
पाण्डित्यभृद् गाण्डिवम् ॥ ९३ ॥

दुर्योधनः —

"द्वौ बाहू चरणौ च तस्य नरव -
त्तुल्यं मुखाक्ष्यादिकं
नद्धं सप्तभिरेव धातुभिरहो
गात्रं सगोत्रं जनैः ।

यद्यप्येवमथापि केन सदसि
प्रस्तौषि पार्थं मुधा ;
राधेयस्य पुरः करिष्यति स किं
क्रोधाज्ज्वलन्नर्जुनः ?" ॥ ९४ ॥

कृष्णः—

"पाञ्चालीवरणोत्सवे रणविधू-
तास्वण्डले खाण्डवे
कुहनाकरातवपुषा
त्वद्घोषयात्रान्तरे ।
उग्रे गोग्रहसङ्गरे च विदित-
स्थामा स भीमानुजो
नूनं न श्रुतिगोचरोऽद्य भवतो
येनेदृशं भाषसे ॥ ९५ ॥

युक्तं यत्तु युधिष्ठिरे विनिकृते
कृष्णावमाने च य-
द्यच्चारण्यनिवासने यदपि स्व-
ल्पज्ञातवासश्रमे ।
यच्चास्त्रेषु ममार्जितेष्वविकलं
यच्च प्रसन्ने हरे
क्रुद्धे यच्च धनञ्जये तदधुना
कर्मैव नो मारयति ॥ ९६ ॥

ग्रामाणामपि पञ्चकं दिशसि चे-
देतावतैवात्मनो
वृत्तिं कापि विधित्सवः शमपरा
वाञ्छन्ति सन्त्याममी ।
दत्वा पित्र्यमुपार्जितं तदधुना
राज्यार्धमेभ्यो भवा-
नास्तामत्र सुखी न चेदपि भव-
न्निष्कौरवं क्ष्मातलम् ” ॥ ९७ ॥

सुयोधनः—

“वाचोयुक्त्यैव राज्यं नहि तव सुहृदां
पैतृकं स्याद्यदेते
कुण्डाः पाण्डौ विमोहाद्धितमुनिवचसे
षण्डभावं प्रपन्ने ।
जाता धर्मानिलाखण्डलसुराभिषजा-
मात्मजास्तुल्यदार-
स्वीकारोद्यत्कलङ्का विपिनभुवममी
यान्तु शान्तावलेपाः” ॥ ९८ ॥

कृष्णः—

“स्वर्यातेऽथ विचित्रवीर्यनृपतौ
व्यासोंऽम्बिकायाममुं
नूनं ते जनयाम्बभूव जनकं
जातोऽसि तद्दौलकात् ।

राज्यार्हः स कथं तथापि बहुधा
किं कत्थसे त्वं मुधा
वक्तुं तत्र समर्थमुत्तरमलं
भैमी गदा केवलम् ” ॥ ९९ ॥

सुयोधनः--

“वक्तव्यं भृत्यवर्गैर्ननु नियतमिदं
भर्तृवाक्यं यथोक्तं
दृप्तोऽसौ बद्धबद्धं भयमुपजनयन्
भाषते यत्स्वयं माम ।
प्रत्यक्षं क्ष्मापतीनां तदयमुपगतो
बध्यतां बध्यतां वा
शक्ताश्चेदेत्य पार्था निजकुनयपथा-
देशिकं मोचयन्तु ” ॥ १०० ॥

इत्युक्त्वैव सभातलाद्विचलिते
दुश्शासनाद्यैस्समं
बन्धुं बन्धहरं हरिं त्रिजगतां
दुर्योधने व्यापृते ।
बुध्वा वृत्तमिदं सभां सरभसं
प्राप्तोऽवदत् सात्यकिः
“ही ही ! साधु चिकीर्षिताऽद्यकुरुभि-
र्वर्या सपर्या हरेः ॥ १०१ ॥

निरुद्यमाः पाण्डसुता मुरारौ
बद्धे भवन्तीति नितान्तमूढाः ।
त्रिभिः सुहृद्यैर्धृतराष्ट्रसूनु-
र्बन्धुं सतामिच्छति बन्धुमेनम् ॥ १०२ ॥

तेनोत्तुङ्गशिखाकलापकपिल-
श्चेलाञ्चलेनानलो
बध्येताथ सदागतेरगतिता
दीयेत पाशैर्दृढैः ।
किञ्चासंयतिमिङ्गिलो जलनिधि-
र्लङ्घ्येत दोष्णा सुखं
कृष्णोऽयं गततृष्णयोगिनिवह-
ध्येयो निबध्येत चेत् " ॥ १०३ ॥

तदनु ते सञ्जाहितमहीपतिवीरपाणिग्राहाः कर्णदुर्योधन-दुश्शासनशकुनिहतकाः "पुरा किल बाल्यचापल्ये गोपालिकया न बद्धोऽसौ "भीमयमलार्जुन"भङ्गहेतुः सञ्जातः ?"? इति पुनरपि तथा कर्तुकामा इव नतबन्धहारिणं बलिबन्धकारिणमुं भुवनैकबन्धुं निजापनयैरेव केवलमबन्धूकृतं बन्धुमिच्छन्तो मृशं स्खला विशृंखला अपि करतलसज्जीकृतरज्जुशृंखलाः सज्जनसदसि लज्जाभयविवर्जिताः दुष्कृतरसात् धिक्कृत-धृतराष्ट्रविदुरबहुतरानिवारणवाक्याः, हीहीरवहाहारवमुखर-

मुखेषु सकलसामाजिकेष्वर्पीतियतेष्वासनेषु निर्गन्तुकामेषु निरोद्धुकामेषु पार्श्ववर्तिनि दीप्तकोपे सात्यकौ सात्वतर्षभभ्रूविभ्रमनिवारिते, निजाक्षौहिणीयुते सभां विविशति धृतायुधवर्माणि कृतवर्माणि, स्पृष्टमात्रे चेष्टरश्चनि दुष्टानमून् पिष्टपेषं पिनष्मीति भीष्मे कृतनिश्चये, शपामि शस्त्रं गृह्णामि वेति विकृते सकृपे संभ्रान्ते च द्रोणाचार्ये, सभाजनार्हाननवेक्ष्य सभाजनमध्ये समापतितुं प्रारभन्त ।

तदानीं च चिदानन्दमयः पुराणपुरुषः परिषन्निषण्णसकलजननयननवामृतायमानवितायमानकलायमानहरकलेवरलक्ष्मीः सभान्तराले सुमेरुशृङ्गतुङ्गमहासनमध्यमध्यासीनो मृगाधिराजः शृगालानिव दुराशयानमून् निरादरदृष्ट्या निरीक्षमाणः तमोमयानामेषां निवारणायेव निजवदनेन्दुकन्दलितसुन्दरतरदन्तपङ्क्तिकान्तिसन्ततमयचन्द्रिकायकरं पुरतः प्रसारयन् "अयि भो सुयोधन ! किमहं निस्सहाय इति बन्धुकामोऽसि" इति वदन् किमप्युच्चैरुज्जहास । तदनु—

तावद्देवस्य देहाज्झटिति पटुतटिद्-
कोटिवत्ताडिताक्षः
संहारोद्भिद्रुद्रस्फुटनिटिलशिखि-
ज्वालजालप्रकाशः ।

कल्पान्तक्रूरसूरोत्करकिरणसमा-
हारघोरः समन्ता-
दारुन्धानस्सभां तां निरपतदतुलः
कोपि तेजस्समूहः ॥ १०४ ॥

ततश्च सर्वतो विसृमरदावपावकज्वालामालोद्गारिमार-
तकशैलशैलिमुद्वहतः सकलमपश्चक्षिभोर्विश्वम्भरस्य तत्क्ष-
णमेव तत्तदवयवेभ्यः पङ्कजसम्भवशङ्करसंक्रन्दनादिवृन्दारक-
वृन्ददनुजमनुजभुजङ्गमप्रमुखा निश्शेषविश्ववासिनोऽप्यहमह-
मिकया समुत्पेतुः ।

तत्र चास्य फालदेशाच्चतुस्सनकसप्तर्षिनवयोगिश्व-
वैश्वानसषष्टिसहस्रवालखिल्याद्यसंख्यमुनिमङ्गपारिमण्डलितः कु-
ण्डिकाक्षसूत्रमण्डितभुजदण्डो द्विण्डते स्म पुण्डरीकभवः ।

ततोऽपि च स्थविष्ठकृशिष्ठद्राघिष्ठह्रसिष्ठकुब्जादिवि-
कृतशरीरभूतप्रेतपिशाचपूतनाडाकिनीकूष्माण्डाष्टभैरवप्रमुखप्रचु-
रप्रमथयूथसहस्रपरिवेष्टितः, अष्टमूर्तिरपि सप्ताकृतिः, संहार-
कतोऽपि रक्षां धारयन्, कठोरकुठारशूलशाली महादेवस्तस्य
हृदयादुदयाञ्चकार ।

बाहुयुगलादपि वह्निकरप्रज्वलितवज्रज्वालाजालदी-
पितं, दण्डधरभुजकाण्डताण्डवितचण्डदण्डस्फुटितस्फुलिङ्गोत्क-
रोत्कीर्णं, यादसांपतिदम्पातानुवर्तिविविधजलचरकुलाकुलं,

गन्धवाहागमनसन्धायमानसुगन्धप्रबन्धान्धीकृतादिगन्तरं, यक्षाधिपानुगतलक्षाधिकयक्षगुह्यकप्रक्षोभितं, षट्षष्टिकोटिसङ्ख्यसुराङ्गनाजनानुनिस्सृतं, निस्सीमगन्धर्वकिन्नरविद्याधरौघविद्योतितं, त्रयस्त्रिंशत्कोटिप्रधाननिर्जरकुलं निर्जगाम ।

वदनाद्दहनो, नासाया नासत्यदस्रौ, विलोचनाद्विरोचनश्च, मनसोऽपि घनसारजंबालसम्बन्धशीतलीकृतमिव मुखनान्तरालमारचयन्नशेषतारकाराजिनीराजितो रराज तारकाराजः ।

तदनन्तरञ्च प्रतिक्षणभक्षितनरमांसप्रक्षरितक्षतजरसोक्षितरूक्षतराक्षातिराक्षसकुलातेक्षुभितपार्श्वाः ३श्वीयमानाभिमाना दानवदैतेयभटा लक्षकोटिशो लक्ष्यन्ते स्म ।

तत्क्षणञ्च चक्षुरुत्क्षारितिक्ष्वेलानलोष्मभीष्मतरभोगमण्डलोद्भूर्यंशूत्कारमयोत्काभिघातोल्कोशितसकललोकं सवासुकि सशेषमप्यशेषमुत्सर्प दर्पोद्धतं सर्पकुलम् । अर्बुदश्च तस्य विश्वतोमुखात्तस्थुः सप्तिग्रथहस्तिपत्तितत्तदायुधसहस्राभिन्यासप्तसप्तार्णवमध्यवर्तिसमस्तधात्रीपतिचक्रसमावृताः ससाम्बप्रद्युम्नगदसारणानिरुद्धा अनिरुद्धाः सर्व एव वृष्णिवीरभटाः ।

दक्षिणबाहोरक्षतवीर्यः 'तिष्ठतिष्ठेति' निष्ठुरवादी कृष्टगाण्डिवः पाण्डवबीरः प्रोदतिष्ठत् ॥

चालतहलमुखनिर्भिन्नमिव भ्रमितमुपलक्षिक्षुण्णमिव मुखं करिष्यन् भीमकोपो वामबाहोः कामपालोऽप्यालोक्यत ।

पृष्ठतश्चेदनिष्ठन् युधिष्ठिरादयश्चत्वारः। बाहवश्च तस्य उग्रतरोद्घूर्णशङ्खचक्रगदाशार्ङ्गनन्दकादिविविधायुधज्वाला-मालालेलिह्यमानदिक्तटा अनेकशः प्रादुरासन्।

सुपर्णश्च तप्तसुवर्णसवर्णस्वपर्णविघूर्णनोदीर्णसामघोष-घोषिताश आकाशे प्रकाशाश्चक्रे।

तदानीं च भक्तिभारावनम्राः पाञ्चजन्यादयः सर्वे देहिनः सकलजगदात्मानं परमात्मानं शक्त्यनुसारेण तत्र सिषेविरे।

ततश्च निबद्धाञ्जलिसमस्तमुनिस्तोमप्रस्तुतविचित्रतर-स्तोत्रनिनदैः मधुरतरलास्यसेवाप्रवृत्तसुरतरुणीचरणताडितत-मणिमञ्जीरमञ्जुशिञ्जितानुबन्धिगन्धर्वकिन्नरवीणावेणुगीतता-रप्रणादैः वृन्दारकवृन्दाहतदुन्दुभिपटहसम्भृतगम्भीरध्वनिभि-श्चतुर्मुखचतुर्मुखीसमुन्मिषितब्रह्मघोषैः आनन्दताण्डवोद्दण्ड-खण्डपरशुकराहोण्डाडिण्डिमचण्डरवामीळितताण्डमृदङ्गरवानुगतच-ण्डिकागानध्वानैः रुद्रानुचरभूतप्रेतवेतालपालिकाहर्षवल्गनोद्गत "कहकाहिका" रवानुमिलिताष्टभैरवाट्टहासैः भगवत् कराश्चित-पाञ्चजन्यस्वयमुदीरितधीरनिनदैरपि न केवलं तत्पुरं जनपदो वा भुवनमशेषमपि घोषमयासीत्।

तत्तेजोनष्टदृष्टिप्रसरमत इतः
कर्णदुर्योधनाद्या
भूपाः प्रागेव पेतुः सतु कृपविदुर
द्रोणभीष्मादिलोकः।

*दिष्ट्या वीरजनप्रियं परिणतं
तावद्रणं दारुणं
निर्यान्तु प्रबलैर्बलैः सह मही-
पाला गृहीतायुधाः ।
पश्यन्त्वत्र पृथाभुवां प्रमाथित-
प्रत्यर्थिशस्त्रोत्करा-
नस्त्रानुग्रतरानुभावभयदान्
दर्वीकरप्रक्रमान् ॥ १११ ॥

यत् सत्यव्रतभङ्गभीरुमनसा
यत्नेन मन्दीकृतं
यद्विस्तब्धमपीहितं शमवता
शान्तिं कुलस्येच्छता ।
तद्यूतारणिसम्भृतं नृपवधूकेशा-
म्बराकर्ष
क्रोधज्योतिरहे ! महत् कुरुवने
यौधिष्ठिरं जृम्भताम् ॥ ११२ ॥

अस्य श्लोकस्य पाठान्तरं दृश्यते । यथा

दिष्ट्या चिरात्परिणतं रणमेव तावत्-
निर्यान्तु भूमिपतयः सह वाहिनीभिः ।
पश्यन्तु तत्र चरितानि पृथासुतानां-
मित्यूचिवान् मधुरिपुर्निरगात्सभायाः ॥

अथ रथवरमश्वैः सैन्यमुख्यैश्चतुर्भि-
धृतधुरमधिरूढः क्षत्तृरालम्ब्य हस्तम् ।
अनुगतमखिलं तद्राजकं वारयित्वा
परिमितपरिवारः पार्थपार्श्वं प्रवेदे ॥ ११३ ॥

नारायणाभिधमहीसुरवर्यवक्त्र-
जैवातृकामृतझरीनिकरायमाणम् ।
हृद्यं प्रबन्धमिदमद्य समाप्तमुद्यद्
गद्यं समस्तमनवद्यवैराजिपद्यम् ॥ ११४ ॥

दूतवाक्यसमाख्यानं
निबन्धनमिदं महत् ।
सद्भिर्मतं कृत्स्नविदुषां
जीयते जगतीतले ॥ ११५ ॥

शुभं भूयात् ।

अथ रथवरमश्वैः सैन्यमुख्यैश्चतुर्भि-
धृतधुरमधिरूढः क्षत्तृरालम्ब्य हस्तम् ।
अनुगतमखिलं तद्राजकं वारयित्वा
परिमितपरिवारः पार्थपार्श्वं प्रवेदे ॥ ११३ ॥

नारायणाभिधमहीसुरवर्यवक्त्र-
जैवातृकामृतझरीनिकरायमाणम् ।
हृद्यं प्रबन्धमिदमद्य समाप्तमुद्यद्
गद्यं समस्तमनवद्यवैराजिपद्यम् ॥ ११४ ॥

दूतवाक्यसमाख्यानं
निबन्धनमिदं महत् ।
सद्भिर्मतं कृत्स्नविदुषां
जीयते जगतीतले ॥ ११५ ॥

शुभं भूयात् ।